श्री गणपति अथर्वशीर्ष

॥ श्री गणपत्यथर्वशीर्ष ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥

स्थिरैरंगैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इंद्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ॥

स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ तन्मामवतु तद् वक्तारमवतु अवतु मां अवतु वक्तारं ।
ॐ शांतिः शांतिः शांतिः ॥

हरिः ॐ नमस्ते गणपतये ।
त्वमेव प्रत्यक्षं तत्त्वमसि ॥

त्वमेव केवलं कर्ताऽसि ।
त्वमेव केवलं धर्ताऽसि ॥

त्वमेव केवलं हर्ताऽसि ।
त्वमेव सर्वं खल्विदं ब्रह्मासि ॥

त्वं साक्षादात्माऽसि नित्यं ॥ 1 ॥

ऋतं वच्मि (वदिष्यामि) ॥

सत्यं वच्मि (वदिष्यामि) ॥ 2 ॥

अव त्वं मां ।
अव वक्तारं ॥

अव श्रोतारं ।
अव दातारं ॥

अव धातारं ।
अवानूचानमव शिष्यं ॥

अव पश्चात्तात् ।
अव पुरस्तात् ॥

अवोत्तरात्तात् ।
अव दक्षिणात्तात् ॥

अव चोर्ध्वात्तात् ।
अवाधरात्तात् ॥

सर्वतो मां पाहि पाहि समंतात् ॥ 3 ॥

त्वं वाङ्मयस्त्वं चिन्मयः ।
त्वमानंदमयस्त्वं ब्रह्ममयः ॥

त्वं सच्चिदानंदाद्वितीयोऽसि ।
त्वं प्रत्यक्षं ब्रह्मासि ॥

त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ 4 ॥

सर्वं जगदिदं त्वत्तो जायते ।
सर्वं जगदिदं त्वत्तस्तिष्ठति ॥

सर्वं जगदिदं त्वयि लयमेष्यति ।
सर्वं जगदिदं त्वयि प्रत्येति ॥

त्वं भूमिरापोऽनलोऽनिलो नभः ॥

त्वं चत्वारि वाक्पदानि ॥ 5 ॥

त्वं गुणत्रयातीतः । त्वमवस्थात्रयातीतः ।
त्वं देहत्रयातीतः ॥

त्वं कालत्रयातीतः ।
त्वं मूलाधारः स्थितोऽसि नित्यं ॥

त्वं शक्तित्रयात्मकः ।
त्वां योगिनो ध्यायंति नित्यं ॥

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिंद्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्मभूर्भुवःस्वरों ॥ 6 ॥

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनंतरं ।
अनुस्वारः परतरः ॥

अर्धेंदुलसितं ।
तारेण ऋद्धं ॥

एतत्तव मनुस्वरूपं ।
गकारः पूर्वरूपं ॥

अकारो मध्यमरूपं ।
अनुस्वारश्चांत्यरूपं ॥

बिंदुरुत्तररूपं ।
नादः संधानं ॥

संहितासंधिः ।
सैषा गणेशविद्या ॥

गणक ऋषिः ।
निचृद्गायत्रीच्छंदः ॥

गणपतिर्देवता ॥

ॐ गं गणपतये नमः ॥ 7 ॥

एकदंताय विद्महे वक्रतुंडाय धीमहि ।
तन्नो दंतिः प्रचोदयात् ॥ 8 ॥

एकदंतं चतुर्हस्तं पाशमंकुशधारिणं ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजं ॥

रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससं ।
रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितं ॥

भक्तानुकंपिनं देवं जगत्कारणमच्युतं ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परं ॥

एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ 9 ॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये
नमस्तेऽस्तु लंबोदरायैकदंताय विघ्ननाशिने शिवसुताय
श्रीवरदमूर्तये नमो नमः ॥ 10 ॥

एतदथर्वशीर्षं योऽधीते ।
स ब्रह्मभूयाय कल्पते ॥

स सर्वतः सुखमेधते ।
स सर्व विघ्नैर्नबाध्यते ॥

स पंचमहापापात्प्रमुच्यते ।
सायमधीयानो दिवसकृतं पापं नाशयति ॥

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।
सायंप्रातः प्रयुंजानो अपापो भवति ॥

सर्वत्राधीयानोऽपविघ्नो भवति ।
धर्मार्थकाममोक्षं च विंदति ॥

इदमथर्वशीर्षमशिष्याय न देयं ।
यो यदि मोहाद्दास्यति स पापीयान् भवति ॥

सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥ 11 ॥

अनेन गणपतिमभिषिंचति स वाग्मी भवति ॥

चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति ।
स यशोवान् भवति ।
इत्यथर्वणवाक्यं ॥

ब्रह्माद्यावरणं विद्यात् न बिभेति कदाचनेति ॥ 12 ॥

यो दूर्वांकुरैर्यजति स वैश्रवणोपमो भवति ।
यो लाजैर्यजति स यशोवान् भवति ॥

स मेधावान् भवति ।
यो मोदकसहस्रेण यजति ॥

स वांछितफलमवाप्नोति ।
यः साज्यसमिद्भिर्यजति ॥

स सर्वं लभते स सर्वं लभते ॥ 13 ॥

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ।
सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमंत्रो भवति ॥

महाविघ्नात्प्रमुच्यते ।
महादोषात्प्रमुच्यते ॥

महापापात् प्रमुच्यते ।
स सर्वविद्भवति स सर्वविद्भवति ॥

य एवं वेद इत्युपनिषत् ॥ 14 ॥

ॐ सहनाववतु ।
सहनौभुनक्तु ॥

सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ॥

स्थिरैरंगैस्तुष्टुवांसस्तनूभिः ।
व्यशेम देवहितं यदायुः ॥

ॐ स्वस्ति न इंद्रो वृद्धश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ॥

स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शांतिः शांतिः शांतिः ॥

॥ इति श्रीगणपत्यथर्वशीर्षं समाप्तं ॥